श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीलक्ष्मीनृसिंहकरावलम्बस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनृसिंहकरावलम्बस्तोत्रम् ॥

तुष्ट्यै सदा भगवतश्चरणारविन्द-
    द्वंद्वावलम्बविभवं तव मेऽद्य देहि।
स्तुत्यै मुकुन्द सुगुणार्णवसर्वभोग्य
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ १ ॥

श्रीतापनीयविदितात्ममहाप्रभाव
    लक्ष्मीसमेत चतुराननरुद्रमुख्यैः।
संसेव्यमानचरणाम्बुज भक्तभोग्य
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ २ ॥

यद्वत्स साधु पठितं कथयेति पुत्रं
    पृच्छत्यहो पितरि नामगुणानुवादः।
विष्णोरिति प्रतिवदन्तमपालयस्त्वं
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ३ ॥

संदीपिताग्निविनिपातितदैत्यडिम्भ-
    संरक्षणाय विनिवर्तितवह्निशक्ते।
भक्ताय दारुपरिकल्पितपद्मतल्प
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ४ ॥

प्रह्लादनाशपरिचोदितसर्पजात-
    चूडामणिप्रवरदन्तविनाशहेतो।
स्मृत्या तवैव न विवेद तनुं सुभक्तः
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ५ ॥

सूतादिदत्तविषपानसमानकाल-
    नामामृतेन परिपालितदैत्यपुत्र।

प्रह्लाददेहपरिरक्षणजागरूक
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ६ ॥

संरुष्टदैत्यपतिचोदितदिग्गजादि-
    दन्तादिनाशपरितोषितभक्तडिम्भ।
भक्ताभिपालनविचित्रविशेषदीक्ष
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ७ ॥

शैलाग्रभागपतमानहिरण्यडिम्भ-
    संरक्षणाय मृदुभूतधराधिनाथ।
दैत्येन्द्रपुत्रहृदयासनमङ्गळाङ्ग
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ८ ॥

विष्णुप्रभावपरिकीर्तनबद्धवैर-
    दैत्येन्द्रबद्धशिशुबन्धनमोक्षहेतो।
क्षिप्तोऽर्णवे तटमगात् कृपया तवैव
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ९ ॥

सर्वेष्वसौ वसति सर्वशरीरविष्णुः
    पृष्टस्त्वया विदित एव पुराप्यनन्तः।
इत्युक्तवन्तमसुरात् परिरक्षसि स्म
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ १० ॥

भक्तस्य दानवशिशोर्वचनञ्च सत्यं
    कर्तुं तदा मुनिगणस्य समक्षमेव।
स्तम्भावतीर्ण दितिपुत्रविनाशकारिन्
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ ११ ॥

सन्दीपिताग्निपरिवेष्टितकाष्ठमध्यं
    संप्रापितां यतितनुं त्वयसापि बद्धाम्।
संरक्षसि स्म शरणागतशङ्करस्त्वं
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ १२ ॥

उत्तारणं कलियुगे त्विति तापनीय-
    श्रुत्युक्त एव गरुडाद्रिबिले नृसिंह।
आविर्बभूविथ जगद्धरणाय यस्त्वं
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ १३ ॥

काले कलौ तु जगतां परिपालनाय
    स्वाराधकान् यतिवरान् परिगृह्य भक्तान्।
ग्रामेषु सञ्चरसि भक्तिपराशयज्ञैः
    लक्ष्मीनृसिंह! मम देहि करावलम्बम्॥ १४ ॥

शन्नो भवत्विति नृसिंहकरावलम्ब-
    स्तोत्रञ्चकार निगमान्तगुरुर्यतीन्द्रः।
सर्वस्य पुत्रधनधान्यसमृद्धिसिद्ध्यै
    दद्याद् रमानरहरिस्स्वकरावलम्बम्॥ १५ ॥

॥ इति श्रीलक्ष्मीनृसिंहकरावलम्बस्तोत्रम् समाप्तम् ॥